मनीषा

पञ्चकम्

॥ मनीषापञ्चकम् ॥

अन्नमयादन्नमयम् अथवा चैतन्यमेव चैतन्यात् ।

द्विजवर दूरीकर्तुं वाञ्छसि किं ब्रूहि गच्छ गच्छेति ॥

किं गङ्गाम्बुनि बिम्बितेऽम्बरमणौ चाण्डालवाटीपयः-

पूरे वान्तरमस्ति काञ्चनघटीमृत्कुम्भयोर्वाम्बरे ।

प्रत्यग्वस्तुनि निस्तरङ्गसहजानन्दावबोधाम्बुधौ

विप्रोऽयं श्वपचोऽयमित्यपि महान् कोऽयम् विभेदभ्रमः ॥

जाग्रत्स्वप्नसुषुप्तिषु स्फुटतरा या संविद् उज्जृम्भते

या ब्रह्मादिपिपीलिकान्ततनुषु प्रोता जगत्साक्षिणी ।

सैवाहं न च दृश्यवस्त्विति दृढप्रज्ञापि यस्यास्ति चेत्

चाण्डालोऽस्तु स तु द्विजोऽस्तु गुरुरित्येषा मनीषा मम ॥१ ॥

ब्रह्मैवाहमिदं जगच्च सकलं चिन्मात्र-विस्तारितं
सर्वं चैतदविद्यया त्रिगुणयाऽशेषं मया कल्पितम्।
इत्थं यस्य दृढा मतिः सुखतरे नित्ये परे निर्मले
चाण्डालोऽस्तु स तु मनीषा मम ॥२॥
शश्वन्नश्वरमेव विश्वमखिलं निश्चित्य वाचा गुरोः
नित्यं ब्रह्म निरन्तरं विमृशता निर्व्याज-शान्तात्मना।
भूतं भावि च दुष्कृतं प्रदहता संविन्मये पावके
प्रारब्धाय समर्पितं स्ववपुरित्येषा मनीषा मम ॥३॥
या तिर्यङ्नरदेवताभिरहम् इत्यन्तः स्फुटा गृह्यते
यद्भासा हृदयाक्षदेहविषया भान्ति स्वतोऽचेतनाः।
तां भास्यैः पिहितार्कमण्डलनिभां स्फूर्तिं सदा भावयन्
योगी निर्वृतमानसो हि गुरुरित्येषा मनिषा मम ॥४

यत्सौख्याम्बुधिलेशलेशत इमे शक्रादयो निर्वृताः ।

यच्चित्ते नितरां प्रशान्तकलने लब्ध्वा मुनिर्निर्वृतः ।

यस्मिन्नित्यसुखाम्बुधौ गलित-धीः ब्रह्मैव न ब्रह्मवित्

यः कश्चित्स सुरेन्द्रवन्दितपदो नूनं मनीषा मम ॥५॥